— तोहयमानः, तोहयिष्यमाणः, — तोतुह्यमानः ; तोतुहिष्यमाणः ;

[1]तुट्-तुड्-तुहौ-तुहः; — — —

[2]तुहितम्-तोहितम्-तः-तवान्, तोहितः, तुतोहिषितः-तुतुहिषितः, तोतुहितः-तवान् ;

तुहः, तोहः, तुतोहिषुः-तुतुहिषुः, तोतुहः ;

तोहितव्यम्, तोहयितव्यम्, तुतोहिषितव्यम्-तुतुहिषितव्यम्, तोतुहितव्यम् ;

तोहनीयम्, तोहनीयम्, तुतोहिषणीयम्-तुतुहिषणीयम्, तोतुहनीयम् ;

तोह्यम्, तोह्यम्, तुतोहिष्यम्-तुतुहिष्यम्, तोतुह्यम् ;

ईषत्तोहः-दुस्तोहः-सुतोहः ; — —

तुह्यमानः, तोह्यमानः, तुतोहिष्यमाणः-तुतुहिष्यमाणः, तोतुह्यमानः ;

तोहः, तोहः, तुतोहिषः-तुतुहिषः, तोतुहः ;

तोहितुम्, तोहयितुम्, तुतोहिषितुम्-तुतुहिषितुम्, तोतुहितुम् ;

[3]तूढिः, तोहना, तुतोहिषा-तुतुहिषा, तोतुहा ;

तोहनम्, तोहनम्, तुतोहिषणम्-तुतुहिषणम्, तोतुहनम् ;

तोहित्वा-तुहित्वा, तोहयित्वा, तुतोहिषित्वा-तुतुहिषित्वा, तोतुहित्वा ;

सन्तुह्य, प्रतोह्य, प्रतुतोहिष्य-प्रतुतुहिष्य, प्रतोतुह्य ;

तोहम् २, तोहित्वा २-तुहित्वा २, } तोहम् २, तोहयित्वा २, } तुतोहिषम् २-तुतुहिषम् २, तुतोहिषित्वा २-तुतुहिषित्वा २, } तोतुहम् २ ; तोतुहित्वा २ ; }

[4]तुहिनम्[A].

(761) " तूण पूरणे " (X-चुरादिः-1690. सक. सेट्. आत्म.)

आकुस्मीयः ।

---

1. क्विपि, 'हो ढः' (8-2-31) इति ढत्वे, जश्त्वचर्त्वयोश्च रूपम् ।
2. 'उदुपधाद् भावादिकर्मणोरन्यतरस्याम्' (1-2-21) इति निष्ठायाः भावे आदिकर्मणि च कित्त्वविकल्पनाद्रूपद्वयम् ।
3. 'तितुत्र—' (7-2-9) इतीण्णिषेधे, ढत्व-धत्व-ष्टुत्व-ढलोप-दीर्घेषु रूपम् ।
4. 'वेपितुह्योर्ह्रस्वश्च' [द. उ. 5-18] इति इनन्प्रत्ययः । तस्य कित्त्वाद् गुणो न । तोहति जनान् इति, तुह्यतेऽर्केणेति वा तुहिनम् = हिमम्, अन्धकारश्च ।

A. 'गोविन्दस्तुहिनांशुरम्यवदनः कंसं जगद्द्रोहिणं
प्रोहिष्यन् जगदर्हणीयमहिमा मोदेन निन्ये निशाम् ॥' धा. का. 1. 92.